International Journal of Sanskrit Research 2015; 1(4): 58-59

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(4): 58-59
© 2015 IJSR
www.sanskritjournal.com
Received: 18-04-2015
Accepted: 14-05-2015

डॉ0 रेनू सिंह
Shahid Smarak Colony
Chauri Chaura Gorakhpur UP-273201

**Correspondence**
डॉ0 रेनू सिंह
Shahid Smarak Colony
Chauri Chaura Gorakhpur UP-273201

# शैवविशिष्टाद्वैतवेदान्तस्य मौलिकता

## डॉ0 रेनू सिंह

**"सा विद्या या विमुक्तये"** इति श्रुत्या धर्मार्थकाममोक्षाख्यपुरूषार्थचतुष्टयेषु मोक्ष एव परमपुरूषार्थः सर्वेषां विद्याप्रस्थानानाम्। तस्य परमपुरुषार्थरूपमोक्षतत्साधनप्रमाणादिनिरूपणपरो ग्रन्थों दर्शनमिति आख्यायते।
न्यायवैशेषिकसांख्ययोगपूर्वोत्तरमीमांसा–भेदेन षट्–दर्शनानि प्रसिद्धानि सन्ति। सर्वाण्यपीमानि दर्शनानि सूत्ररूपाणि नैकेः महर्षिभिः प्रणीतानि। परमर्षिणा व्यासप्रणीतं वेदान्तदर्शनम् औपनिषद्दर्शनमित्यपराभिधेयम् च। उपनिषदः अविद्यादिसंसारबीजविशरणशीलत्वाद् उपनिच्छब्दस्य मुख्यवृत्या ब्रह्मविद्यैव अर्थ इति तत्र भाष्येषु वेदान्तप्रस्थाने संगिरन्ते ब्रह्मवादिनः। उप्नि पूर्वकस्य विशरणगत्यावसादनार्थकस्य षद्लृ धातोः क्विप्प्रत्ययान्तस्य इदं रूपमुपनिषदिति।

**"तद्विद्धिप्रणिपातेन परिप्रश्नेन सेवया"**।[1]

इति गीतावचनानुसारं गुरुमुपदेशं निशम्य ब्रह्मविद्यां निश्चयेन तन्निष्ठता परिशीलयन्ति ये दृष्टानुश्राविकविषयवितृष्णास्सन्तः तेषामविद्यादेः संसारानर्थहेतुभूतस्य विशरणकर्णी विनाशयत्री अवसादयत्री या सैव ब्रह्मविद्या। एतादृशब्रह्मविद्यामुपनिषच्छब्दवाच्यां तत्त्वेन अधिगमयितुं प्रवर्तमानं शास्त्रं वेदान्तशास्त्रं। उपनिषद्श्च निर्गुणं=ज्ञेयं, सगुणं=उपास्यश्च ब्रह्म उपदिशन्ति। उपनिषदां सगुणनिर्गुणवाक्यानि सूत्रैः विचार्य निर्णयन्ति भगवान् बादरायणः।उपास्यब्रह्मविचार परम अन्यत् शास्त्रं नास्ति, निगुर्णब्रह्मविचारकर्तुः अधिकारात् सगुणब्रह्मविचारकर्तुः अधिकारों भिन्नः, सगुणब्रह्मोपासनं कर्मसमुच्चितं भवति। तत्फलं च यथोपासनाब्रह्मलोकादिप्राप्तिः, एवं सति अधिकारिद्वसाधारण्येन ब्रह्मविचाराङ्गभूतः अथ शब्दार्थो वर्णनीयः। अतः न इदं अद्वैतनिर्गुणब्रह्मविचारप्रधान इदं उपनिषच्छब्दवाच्यं वेदान्तशास्त्रमिति।

### वेदान्तदर्शनस्य वैशिष्ट्यम्–

विदितमेवैतत् सम एषां विदुषां परमतत्त्वंप्रदर्शनाय प्रवृत्तं वेदान्तदर्शनम्। वेदान्ते अन्तोनिर्णयः परमपुरुषविषयः यत्रास्ति स वेदभागः वेदान्तशब्देन व्यवह्रियते। तदिदं दर्शनं पुरुषमधिगमयतीति। **"तं त्वौपनिषदं पुरुषं पृच्छामि"**[2]
इति श्रुतिरावेदयति। उपनिषदेकसमधिगम्यं परतत्वमिति **"वेदान्तविज्ञानसुनिश्चितार्थाः"**[3], **"शास्त्रयोनित्वात्"**[4] इत्यादिभिः प्रमाणवचनैः अवगच्छामः। **"तद्विष्णोः परमं पदम्"**[5] इति श्रुत्यानुसारं मुमुक्षोः संसाराध्वनः पारं परमं विष्णुपदं प्रस्थितस्य तद्विद्योपदेशरूपः मार्गः वेदान्तः प्रस्थानशब्देनाभिधीयते। तदुक्तं लोचने अभिनवगुप्तेन– **"प्रतिष्ठनते परम्परया व्यवहरन्ति येन मार्गेण तत्प्रस्थानम्"**[6] इति। तथा च उपनिषद्प्रस्थानं सूत्रप्रस्थानं, गीताप्रस्थानमिति प्रस्थानत्रयमपि मुमुक्षोरधिगन्तव्यं तत्त्वम् अवबोधयति। त्रिष्वपि उपनिषद्ब्रह्मसूत्रगीताप्रस्थानेषु तत्त्वप्रतिपादनप्रकारभेद एव न तु तत्त्वंभेदः। वेदान्तार्थनिर्णये उपनिषत्प्रस्थानं प्रमुखं स्थानं भजते, श्रुतिरूपत्वात्, अन्यद्द्वयं वेदमूलकं स्मृतिवत्। तन्मूलकत्वेनैव प्रमाणपदवीं भजत इति, तत्तत्प्रस्थानमधिरूढानां नातिरोहितमेतत्।

### सूत्रप्रस्थानम्–

व्यासः, द्वैपायनः, कृष्णद्वैपायनः, बादरायणः, पाराशरि उपान्तरतमा इत्यादिनाम्ना प्रथितेन बादरायणेन सूत्रप्रस्थानं प्रवर्तितम्। तत्प्रवर्तितदर्शन वेदान्तशास्त्रं, शारीरकमीमांसा, वाक्यशास्त्रं, ब्रह्ममीमांसा, वेदान्तवाक्यमीमांसा इत्यादिपदेन व्यपदिश्यते तत्र तत्र ग्रन्थेषु। भगवान् बादरायणविरचितब्रह्मसूत्रस्य श्रीकण्ठशंकररामानुजानन्दतीर्थप्रभृतयः नैके आचार्याः स्व स्व मतमुपस्थापनपुरः सरं भाष्यं व्यरचन्। तेषां साम्प्रतमतिप्रसिद्ध्या लब्धप्राचाराणि श्रीकण्ठीय–भगवत्पादीय–रामानुजीय– आनन्दतीर्थीयसंज्ञानि चत्वार्येव भाष्याणि बह्वीभिः व्याख्याभिः उपबृंहितानि सर्वतः प्रचरन्ति। तत्र श्रीकण्ठाचार्येण शैवविशिष्टाद्वैतप्रतिपादकं शैवभाष्यं( श्रीकण्ठभाष्यं), भगवत्पादाचार्यशंकरैः अद्वैतप्रतिपादकं शांकरभाष्यम्, रामानुजाचार्यैः विशिष्टाद्वैतप्रतिपादकं श्रीभाष्यम्, आनन्दतीर्थैः द्वैतप्रतिपादकं पूर्णप्रज्ञभाष्यं विचरितम्। रामानुजैः यः

सिद्धान्तः प्रवर्तितः सः विशिष्टाद्वैतसिद्धान्तत्वेन ख्यातिमलभत। विशिष्टाद्वैतपरम्परायामपि नैके आचार्याः अभूवन्, यैः अयं सिद्धसन्तः प्रचारितः। श्रीकण्ठपरम्परायां आचार्य अप्पयदीक्षितः महता प्रयासेन श्रीकण्ठीयं शैवाद्वैतपरं व्याचयेयमिति विचिन्त्य चिन्नबोम्मभूपालप्रेरणया विरचितवान्।

**शैवसिद्धान्तस्यैतिह्यम् (परिचयः)–**

भारतभूमौ भगवतः शिवस्योपासना वैदिककालादेव प्रचलिता वर्तते श्वेताश्वतरोपनिषदि शिवं सर्वाननशिरोग्रीवः, सर्वभूतगुहाशयः, सर्वव्यापी सर्वगतश्चोक्तः। भगवतः शंकराचार्येणापि ब्रह्मसूत्रशांकरभाष्ये माहेश्वरसम्प्रदायस्योल्लेखः कृतः। परवर्ती आचार्यैः अयं सम्प्रदायः भिन्न भिन्न

नाम्ना सांकेतितः। शैवदर्शनस्य प्रचारप्रसारक्षेत्रं दक्षिणभारतं तमिलप्रान्तमस्ति। शैवानुयायिनः शंकरस्य उपासनया शैवसिद्धान्तप्रतिपादकं स्तोत्रं तामिलभाषायां रचितवन्तः। तेषु चत्वारः प्रमुखाः आसन् सन्त्अप्पारः, सन्तज्ञानसंबन्धः, सन्तसुन्दरः, सन्तमाणिक्कवाचकः इति। मेयाकण्डादि अंतिमः चत्वारः संताचार्याः अभूवन्। यतोहि ये क्रमादेककस्य अपरः शिष्यः आसन्। एवं तामिलशैवेः स्वस्य स्वतन्त्रोपासनाविधानस्य निर्माणं कृतं, सैव तामिलशैवसिद्धांत उच्यते।

सम्प्रति अयं माहेश्वरसम्प्रदायः चतुर्विधः प्राप्यते। पाशुपतः, शैवः, कालामुखः, कापालिकश्च। यद्यपि आचार्यशंकरः ब्रह्मसूत्रभाष्ये पाशुपत्–समप्रदायं वेदबाह्य उक्तवान्। **“ सा चेयं वेदबाह्योश्वरकल्पनानेक प्रकाराः”** [7]। परन्तु श्रीकण्ठाचार्येण वेदशिवागमौ समौ प्रामाणिकौ चौक्तौ। तत्रैव अप्पयदीक्षिताचार्यैः शिवार्कमणिदीपिकायां शिवागमः वैदिकावैदिकः द्विविधः प्रतिपादितः। वेदाधिकारिणी कृते वैदिकतन्त्रः, वेदानधिकारिणाञ्च कृते अवैदिक तन्त्रः। अतः उभावपि प्रामाणिकौ।

दार्शनिकविवेचन (तत्त्वमीमांसा–ज्ञानमीमांसा) दृष्ट्या माहेश्वर (शैव)–सम्प्रदायः त्रिविधः – द्वैतशिवतन्त्रः, द्वैताद्वैतरुद्रतन्त्रः, अद्वैतभैरवतन्त्रः। अस्य च शैव (तन्त्र) सिद्धान्तस्य क्षेत्रं तमिल प्रान्तमासीत्। द्वैताद्वैत सिद्धान्तस्य क्षेत्रं गुर्जरप्रान्तमासीत्, अद्वैतभैरवतन्त्रं कश्मीरप्रान्ते अभवत्। ' सर्वदर्शनसंग्रहे माधवाचार्येण सूचितं' 'शैवसमूहः तमिलदेशस्य' 'शैवसिद्धान्तं सूचयति।। शैवसिद्धान्तस्य प्रमुखः ग्रन्थः 'शिवसूत्रम्' अष्टमनवमशताब्द्यां विरचितम्। वासुगुप्तः 'स्पन्दकारिका' नवम– शताब्द्यामलिखत्।

कालान्तरे शैवाचार्यैः शैवतन्त्रसिद्धान्तप्रतिपादनस्य श्लाघ्यः प्रयासः अभवत्। तेषु सद्योज्योतिहरदत्तशिवाचार्याश्च प्रमुखाः आसन्। हरदत्तशिवाचार्यः श्रुतिसूक्तमालायां वेदवेदान्तस्य तात्पर्यं शिवमाहात्म्यप्रतिपादेन एव वर्तते इति प्रतिपादितवान्।

**सन्दर्भग्रन्थ सूची–**


1. भगवद्गीता 4.36
2. बृहदारण्यकोपनिषद् 5.1.26
3. तैत्तरीयोपनिषद् 12.3
4. ब्रह्मसूत्रशांकरभाष्यम् 12.3
5. कठोपनिषद् 1.3.10
6. ध्वन्यालोकलोचनम्
7. ब्रह्मसूत्रशांकरभाष्यम् 2.2.37
8. शिवार्कमणिदीपिका–भूमिका